**दिनाङ्क :-03.12.2025**

**प्रातः - 06:55**

## संसद- शीतकालीन अधिवेशन

आगामिसप्ताहे लोकसभायां राष्ट्रगीतस्य वन्देमातरम् इत्यस्य पञ्चाशदुत्तर-एकशत-तम-वर्षपूर्तौ, निर्वाचन-परिष्कारस्य च विषये विशेषचर्चा भविष्यति। संसदीय-कार्याणां मन्त्री किरेन् रिजिजुः संसदभवने पत्रकारैः सह संवादं कुर्वन्, उक्तवान्, यत् लोकसभा अध्यक्षस्य ओम बिर्ला इत्यस्य अध्यक्षतायां सर्वदलीय-सभायां निर्णयः कृतः यत् लोकसभायां दिसम्बर्-मासस्य अष्टम-दिनाङ्के, वन्देमातरम् इत्यस्योपरि चर्चा भविष्यति, अथ नवम-दशम-दिनाङ्केषु निर्वाचन-परिष्कार-विषये दश-घण्टानां यावत् चर्चा भविष्यति। किरेन् रिजिजुः अवदत् यत् प्रजातन्त्रस्य कृते निर्वाचनप्रक्रिया अत्यन्तं महत्त्वपूर्णा अस्ति।

श्री रिजिजुः अवदत् यत्, एसआईआर एकः प्रशासनिकः विषयः अस्ति यस्य निर्णयः भारतस्य निर्वाचन-आयोगेन कृतः। सः अवदत् यत्, सर्वे सदस्याः चर्चायाः कृते सहमताः सन्ति अथ सर्वकारः अतीव रचनात्मक-आकर्षक-चर्चां प्रतीक्षते।

## राष्ट्रपति केरेला भ्रमणम् :

राष्ट्रपतिः द्रौपदी मुर्मूः अद्य अपराह्णे, नौसेनायाः परिचालन-प्रदर्शने, मुख्यातिथिरूपेण, भागं ग्रहीतुं, केरलस्य तिरुवनन्तपुरम् गमिष्यति। परिचालनप्रदर्शने नौसेना, स्वसामर्थ्यं, युद्धसज्जतां च प्रकाशयिष्यति, यत्र एकोनविंशतिः प्रमुखाः युद्धपोताः, द्वात्रिंशत् - विमानाः च सन्ति।

## शाह-सेवा तीर्थ

प्रधानमन्त्री नरेन्द्रमोदी ह्यः प्रधानमन्त्रि-कार्यालयस्य नाम सेवा-तीर्थ इति परिवर्तितवान्। सामाजिक अन्तर्जालीय सन्देशे गृहमन्त्री अमितशाहः, राजभवनस्य राजनिवासस्य च नाम लोकभवनम्, लोकनिवासः इति परिवर्तनं क्रियते इति घोषितवान्। सः अवदत्, यदेतत्, विकसितस्य श्रेष्ठ-भारतस्य निर्माणाय महत्त्वपूर्णं सोपानम् वर्तते।

## सिन्धिया सञ्चर साथी

केन्द्रीय-सञ्चार-मन्त्री ज्योतिरादित्य-सिन्धिया उक्तवान्, यत् सञ्चार-साथी एप् पूर्णतया लोकतान्त्रिकः वर्तते । सामाजिकमाध्यम-सन्देशे सिन्धियामहोदयेन उक्तं यत् देशस्य प्रत्येकस्य नागरिकस्य डिजिटलसुरक्षा एव सर्वकारस्य सर्वोच्च-प्राथमिकता अस्ति । सः व्याख्यातवान् यत् उपयोक्तारः स्वस्य सौविध्यानुसारं एप्-इत्यस्य अनुप्रयोगस्य डाउनलोड् इति अवातरणं कृत्वा, अस्य लाभं प्राप्तुं शक्नुवन्ति।

## काशी तमिल संगमम्

शिक्षामन्त्री धर्मेन्द्रप्रधानः उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः च ह्यः वाराणसीनगरे चतुर्थस्य काशी-तमिल-संगमस्य उद्घाटनं कृतवन्तौ । तमिलनाडुतः चतुश्शतोत्तर-एकसहस्राधिकाः प्रतिनिधयः अस्मिन् कार्यक्रमे भागं गृह्णन्ति ।

तन्मध्ये मुख्यमन्त्री योगी आदित्यनाथः अवदत् यत्, राज्यसर्वकारेण व्यावसायिक-शिक्षायां,

तमिळु, कन्नड, मलयालम्, तेलुगु, मराठी, बङ्गला इत्यादीनां भाषाणां समावेशः कृतः। मुख्यमन्त्री उक्तवान् यत् छात्राः स्व-रुच्यनुसारं एतासु भाषासु एकां भाषां चिन्वन्ति, तस्य सम्पूर्णं व्ययं सर्वकारः एव करोति ।

## श्रीलंका- ऑपरेशन सागर बंधु

भारतम्, चक्रवात-प्रभावित-श्रीलङ्का-देशाय ऑपरेशन सागरबन्धु इत्यस्य अन्तर्गतं सहायतां प्रयच्छति । श्रीलङ्कादेशः विनाशकारी-जलप्रलयेन, विनाशेन, प्राणानां सम्पत्तिनां च नष्टेन, व्यापक-भूस्खलनेन च ग्रस्तः अस्ति । अस्याम् राष्ट्रिय-आपदि मृतानां संख्या पञ्चषष्ट्युत्तर-चतुश्शतम् यावत् अभवत् ।

## भारत-दक्षिण आफ्रिका - क्रिकेट

भारत-दक्षिण-आफ्रिकायोः मध्ये एकदिवसीय-क्रीडा-त्रय-श्रृङ्खलायाः द्वितीया क्रिकेट-क्रीडा-प्रतियोगिता अद्य रायपुर-नगरे भविष्यति । इयं क्रीडाद्वन्द्वम्, भारतीय-कालमानानुसारम्, अपराह्ने सार्धैकवादने आरप्स्यते । भारतं श्रृङ्खलायां एकं द्वन्द्वं विजित्य अग्रे वर्तते ।